# NCERT Solutions Class 6 Sanskrit (Deepakam)

## Chapter 14 माधवस्य प्रियम् अङ्गम्

**वयम् अभ्यासं कुर्मः**

**१. चित्रं दृष्ट्वा अङ्गस्य नाम लिखन्तु ।**

**उत्तरम्:**

**२. कोष्ठकात् समुचितं क्रियापदं चित्वा उदाहरणानुसारम् अङ्गस्य कार्यं लिखन्तु ।**

यथा – नयनं – पश्यति

**(क) मुखम् – .......... (चलति, हसति वदति)**

**उत्तरम्:** मुखम् – वदति

**(ख) पादः – ........... (लिखति, चलति पश्यति)**

**उत्तरम्:** पादः – चलति

**(ग) कर्णः – ........... (हसति वदति, शृणोति)**

**उत्तरम्:** कर्णः – शृणोति

**(घ) नासिका – ........... (आघ्राणं करोति, नृत्यति धावति)**

**उत्तरम्:** नासिका – आघ्राणं करोति

**(ङ) जिह्वा – ............ (धावनं करोति, आस्वादनं करोति, पश्यति)**

**उत्तरम्:** जिह्वा – आस्वादनं करोति

**३. कोष्ठकात् समुचितां संख्यां चित्वा रिक्तस्थानं पूरयन्तु।**

**(क) मम ............ शिरः अस्ति । (एकम् अनेकं चत्वारि )**

**उत्तरम्:** मम एकम् शिरः अस्ति ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(ख) मम ........ पादौ स्तः । (त्रयः, द्वौ, पञ्च)**
**उत्तरम्:** मम द्वौ पादौ स्तः ।

**(ग) मम ....... केशाः सन्ति । (दश, अष्ट, बहव:)**
**उत्तरम्:** मम बहवः केशाः सन्ति ।

**(घ) मम ........... दन्ताः सन्ति । (चत्वारः, अष्टाविंशतिः, द्वात्रिंशत् )**
**उत्तरम्:** मम अष्टाविंशतिः दन्ताः सन्ति ।

**(ङ) मम हस्तयोः ........ अङ्गुल्यः सन्ति । (अष्ट, दश, पञ्चदश )**
**उत्तरम्:** मम हस्तयो: दश अङ्गुल्यः सन्ति ।

**४. कोष्ठकात् समुचितं क्रियापदं चित्वा उदाहरणानुसारं शरीराङ्गस्य नाम लिखन्तु ।**
यथा- नयनम्। <u>पश्यति</u>

**(क) शृणोति – ............। (गुल्फ : चिबुकम् कर्ण:)**
**उत्तरम्:** शृणोति – कर्णः ।

**(ख) धावति – ...........। (पादद्वयम्, हस्तद्वयम्, नयनद्वयम् )**
**उत्तरम्:** धावति – पादद्वयम् ।

**(ग) नमति – .......... । (शिर:, कूर्पर:, जङ्घा)**
**उत्तरम्:** नमति – शिरः ।

**(घ) सूचयति – .......... । (अङ्गुली, नख:, चरण:)**
**उत्तरम्:** सूचयति – अंगुली ।

**(ङ) लिखति – ............ । (हस्त:, मणिबन्ध:, कटि:)**
**उत्तरम्:** लिखति – हस्तः ।

**5. पट्टिकातः शब्दान् चित्वा यथायोग्यं गणेषु लिखन्तु ।**

नासिका मणिबन्धः चिबुकम् कूर्परः हस्त: मणिबन्धः कपोल:

Get More Learning Materials Here : CLICK HERE www.studentbro.in

भुजः ललाटम् स्कन्धः जङ्घा नयनम् जानु ऊरुः
**उत्तरम्:**

**६. कोष्ठकात् समुचितं पदं चिन्वा वाक्यानि ‘रचयन्तु।**

**(क) अहं ........... गायनं करोमि ।**
**(पादेन, नासिकया, मुखेन)**
**उत्तरम्:** अहं मुखेन गायनं करोमि ।

**(ख) अहं .......... धावनं करोमि ।**
**(पादाभ्यां, ललाटेन, कूर्परेण)**
**उत्तरम्:** अहं पादाभ्यां धावनं करोमि ।

**(ग) अहं .......... आघ्राणं करोमि ।**
**(नखैः, नासिकया, चरणेन)**
**उत्तरम्:** अहं नासिकया आघ्राणं करोमि ।

**(घ) अहं .......... श्रवणं करोमि ।**
**(कर्णाभ्याम्, नासिकया, अङ्गुष्ठैः)**
**उत्तरम्:** अहं कर्णाभ्याम् श्रवणं करोमि ।

**(ङ) अहं .......... भोजनं करोमि ।**
**(मुखेन पादेन, नासिकया)**
**उत्तरम्:** अहं मुखेन भोजनं करोमि ।

**७. पट्टिकातः समुचितं शरीराङ्गं चित्वा भगिनी कुत्र किं धरति इति सूचयन्तु।**

कण्ठे ललाटे नयनयोः ओष्ठयोः पादयोः
कर्णयोः हस्तयोः वामहस्ते अङ्गुल्यां नेत्रयोः

**भगिनी .......... पादुकाद्वयं धरति ।**
**उत्तरम्:** भगिनी पादयोः पादुकाद्वयं धरति ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**भगिनी ............ कङ्कणानि धरति।**

**उत्तरम्:** भगिनी हस्तयोः कङ्कणानि धरति ।

**भगिनी ............. मुद्रिका धरति ।**

**उत्तरम्:** भगिनी अङ्गुल्यां मुद्रिकां धरति ।

**भगिनी ........... घटीयन्त्रं धरति ।**

**उत्तरम्:** भगिनी वामहस्ते घटीयन्त्रं धरति ।

**भगिनी ........... मालां धरति ।**

**उत्तरम्:** भगिनी कण्ठे मालां धरति ।

**भगिनी ............ कुण्डलद्वयं धरति ।**

**उत्तरम्:**भगिनी कर्णयोः कुण्डलद्वयं धरति ।

**भगिनी ........... उपनेत्रं धरति ।**

**उत्तरम्:** भगिनी नेत्रयोः उपनेत्रं धरति ।

**भगिनी .......... कुङ्कुमं धरति ।**

**उत्तरम्:** भगिनी ललाटे कुङ्कुमं धरति ।

**भगिनी ......... ओष्ठरागं धरति ।**

**उत्तरम्:** भगिनी ओष्ठयोः ओष्ठरागं धरति ।

**भगिनी ........... कज्जलं धरति ।**

**उत्तरम्:** भगिनी नयनयोः कज्जलं धरति ।

**८. वाक्यं शुद्धम् अशुद्धं वा इति सूचयन्तु**

**(क) अहं कर्णाभ्यां भोजनं करोमि । (शुद्ध / अशुद्धम् )**

**उत्तरम्:** अशुद्धम्

**(ख) अहं नासिकाद्वारा श्वासं स्वीकरोमि । (शुद्धम् / अशुद्धम्)**

**उत्तरम्:** शुद्धम्

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(ग) अहम् अङ्गुष्ठैः गणनां करोमि । (शुद्धम् / अशुद्धम्)**
**उत्तरम्:** शुद्धम्

**(घ) अहं नयनाभ्यां श्रवणं करोमि । (शुद्धम् / अशुद्धम्)**
**उत्तरम्:** अशुद्धम्

**(ङ) अहं हस्तेन कार्यं करोमि । (शुद्धम् / अशुद्धम्)**
**उत्तरम्:** शुद्धम्

**योग्यताविस्तरः**

**मधुराष्टकम्**

अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम् ।
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम् ॥१॥
वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम् ।
चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥२॥
वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ ।
नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम् ||३||
गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम्।
रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम् ||४||
करणं मधुरं तरणं मधुरं हरणं मधुरं रमणं मधुरम् ।
वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥५॥
गुञ्जा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा ।
सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम् ||६||
गोपी मधुरा लीला मधुरा युक्तं मधुरं मुक्तं मधुरम् ।
दृष्टं मधुरं सृष्टं मधुरं मधुराधिपतेरखिलं मधुरम् ॥७॥
गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा ।
दलितं मधुरं फलितं मधुरं मधुराधिपतेखिलं मधुरम् ||८||
श्रीवल्लभाचार्य कृतं मधुराष्टकम्

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**गतिविधि-कार्यम्**

कक्षायां सर्वे छात्राः शिक्षकस्य मार्गदर्शनेन अस्य पाठस्य नाट्याभिनयं कुर्वन्तु ।

परियोजनाकार्यम्|
योग्यताविस्तरभागे विद्यमानं चित्रं स्फोरकपत्रे रचयित्वा अङ्गानां नामानि लिखन्तु ।
**उत्तरम्:** छात्राः स्वमेव कुर्वन्तु ।

## पठित-अवबोधनम्

**I. अवबोधन कार्यम्**

**१. निम्नलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत-**

माधवः विचारयति बोधयति च-
'मम शरीरस्य सर्वाणि अङ्गानि मम कृते उपकारकाणि सन्ति । अहम् नेत्राभ्याम् पश्यामि, कर्णाभ्याम् शृणोमि मुखेन भाषणं करोमि भोजनं करोमि च, उदरेण पाचनात् शक्तिं प्राप्नोमि पादाभ्याम् च चलामि। अतः भवन्तः सर्वेऽपि श्रेष्ठाः ।

**प्रश्नाः-**
I. एकपदेन उत्तरत-

**(i) माधवः काभ्याम् चलति ?**
**उत्तरम्:** पादाभ्याम्

**(ii) माधवः काभ्याम् पश्यति?**
**उत्तरम्:** नेत्राभ्याम्

**(iii) सः उदरेण पाचनात् किं प्राप्नोति ?**
**उत्तरम्:** शक्तिं

**(iv) सर्वाणि अङ्गानि कीदृशनि सन्ति?**
**उत्तरम्:** उपकारकाणि

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**II. पूर्णवाक्येन उत्तरत-**

**(i) माधव: मुखेन किम् – किम् करोति ?**

**उत्तरम्:** माधव मुखेन भाषणं करोति भोजनं च करोति ।

**III. निर्देशानुसारं उत्तरत-**

**(i) 'चलामि' इत्यंत्र कः पुरुषः ?**

(क) प्रथम पुरुष:

(ख) मध्यम पुरुष:

(ग) उत्तम पुरुष:

**उत्तरम्:** (ग) उत्तम पुरुष:

**(ii) 'अहम्' नेत्राभ्याम् पश्यामि ।' अस्मिन् वाक्ये क्रियापदं किम् ?**

(क) पश्यामि

(ख) अहम्

(ग) नेत्राभ्याम्

(घ) माधवः

**उत्तरम्:** (क) पश्यामि

**२. वाक्येषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

**(i) माधवः स्वपने <u>स्वशरीरस्य</u> अङ्गानि दृष्टवान्।**

**उत्तरम्:** माधवः स्वपने कस्य अङ्गानि दृष्टवान् ?

**(ii) <u>कर्णः</u> स्मितं कृत्वा कथयति ।**

**उत्तरम्:** कः स्मितं कृत्वा कथयति ?

**(iii) <u>भवन्तः</u> सबलाः भवन्ति ।**

**उत्तरम्:** के सबलाः भवन्ति ?

**(iv) <u>माधव:</u> विचारयति ।**

**उत्तरम्:** कः विचारयति ?

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(v) सः <u>नेत्राभ्याम्</u> पश्यति ।**

**उत्तरम्:** स: काभ्याम् पश्यति?

**द्वौ पादाभ्याम्, नेत्रेण, मुखेन, एका, नेत्राभ्याम्**

**(i) मोहन ................ काणः अस्ति ।**

**उत्तरम्:** नेत्रेण

**(ii) नायक: ......... अन्धः अस्ति ।**

**उत्तरम्:**

नेत्राभ्याम्

**(iii) नरस्य .......... कर्णौ स्तः ।**

**उत्तरम्:** द्वौ

**(iv) मुखे ........ नासिका भवति ।**

**उत्तरम्:** एका

**(v) नरः ...... जलं पिबति ।**

**उत्तरम्:** मुखेन

**(vi) अहम् ........ चलामि ।**

**उत्तरम्:** पादाभ्याम्

**४. पर्यायपदान् समुचितं मेलयत-**

**उत्तरम्:**

Get More Learning Materials Here : CLICK HERE www.studentbro.in